# Shri Ramashtaprasastutih

# શ્રીરામાષ્ટપ્રાસસ્તુતિઃ

## Document Information

Text title : rAmAShTaprAsastutiH

File name : rAmAShTaprAsastutiH.itx

Category : raama, aShTaka

Location : doc_raama

Proofread by : PSA Easwaran psawaswaran

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીરામાષ્ટપ્રાસસ્તુતિઃ

કર્તા કઞ્જભવાત્મના ત્રિજગતાં ભર્તા મુકુન્દાત્મના
હર્તા યશ્ચ હરાત્મનાઘમખિલં સ્મર્તા ચ યસ્યોજ્ઝતિ ।
ધર્તારં ધનુષઃ શરૈસ્સહ તમાદર્તારમાર્તાન્વયં
સર્તારોઽપ્યપથે શ્રિતા રઘુપતિં વર્તામહે નિર્ભયાઃ ॥ ૧॥

કારાગારસમાનસંસૃતિનિરાકારાય સચ્ચિન્મયં
ધીરા યં શરણં વ્રજન્તિ ભુવને નીરાગમોહસ્મયાઃ ।
તારાદેવરમુખ્યવાનરપરીવારાય નીરાકર-
સ્ફારાટોપહરાય રાવણજિતે વીરાય તસ્મૈ નમઃ ॥ ૨॥

કિં દેવૈરિતરૈઃ પ્રપન્નભરણે સન્દેહકૃદ્ભિર્નૃણાં
વિન્દેયં યદિ તાન્ વિમૂઢ ઇતિ માં નિન્દેયુરાર્યા ન કિમ્ ।
કિં દેયં કિમદેયમિત્યવિદુરં તં દેહિનામિષ્ટદં
વન્દે કઞ્ચન વઞ્ચનામૃગરિપું મન્દેતરશ્રેયસે ॥ ૩॥

ગાત્રેષુ શ્રમમગ્નિમાન્દ્યમુદરે નેત્રે જડત્વં સહ
શ્રોત્રેણાદિશતી જરા વિશતિ ચેત્ કોઽત્રેરયેન્માસ્ત્વતિ ।
દાત્રે યત્તુ નમોઽધુનાઽપિ કલયે સ્તોત્રેણ વિત્તાશયા
મૈત્રે જન્મજુષે કુલે કૃતનતિર્નેત્રે તદુજ્ઝામ્યહમ્ ॥ ૪॥

જાતો યો મિહિરાન્વયે નિયમિના નીતો મખં રક્ષિતું
શાતોદર્યપિ યેન ગૌતમમુનેઃ પૂતોપલત્વં જહૌ ।
છાતોમાપતિકાર્મુકં સદસિ યં સીતોપલેભે પતિં
નાતો રાઘવતોઽપરં શરણમિત્યાતોદ્યમાઘોષયે ॥ ૫॥

નાહં પુત્રકલત્રમિત્રવિષયે સ્નેહં વિહાતું ક્ષમઃ
સાહઙ્કારમિદં મનશ્ચ ન કૃતોત્સાહં ગુરૂપાસને ।
દેહં નશ્વરમન્તકસ્ય ન દયા હા હન્ત તેનોજ્ઝિતું
મોહં નૌમિ રુચા વિડમ્બિતપયોવાહં રઘૂણાં પતિમ્ ॥ ૬॥

શ્રીહીનં વ્યથયન્તિ યે ધનમદાદેહીતિ યાહીતિ તાન્
વાહીકાનિવ ન સ્મરામ્યપિ પતીન્ દોહીયસીનાં ગવામ્ ।
દેહીતીરિતમન્તરેણ દદતે યો હીહિતં દેહિનાં
પાહીતિ બ્રુવતો રઘૂદ્વહ દયાવાહી સ સેવ્યોઽસિ મે ॥ ૭॥

શ્રુત્વા વેદશિરાંસિ તન્નિગદિતં મત્વા યથાવન્નરઃ
સ્મૃત્વાઽભીક્ષ્ણમિદં લભેત વિશયં હિત્વાઽઽત્મસાક્ષાત્કૃતિમ્ ।
યત્ત્વાહ ક્રમમિત્થમાગમશિરસ્તત્ત્વાવબોધોદયે
સત્ત્વાકાર તદેવ રામ સુલભં ન ત્વામનત્વા નૃણામ્ ॥ ૮॥

હન્તું પ્રાક્તનદુષ્કૃતાનિ જગતાં મન્તું ભૃશાનિત્યતાં
કન્તું જેતુમમુત્ર ચેહ સમુપારન્તું ફલેષ્વાદરાત્ ।
યન્તું સેન્દ્રિયજાતમાગમશિરો ગન્તું ચ વક્ત્રાદ્ગુરોઃ
તન્તું ચણ્ડકરાન્વયસ્ય કલયે તં તુઙ્ગચાપં પ્રભુમ્ ॥ ૯॥

ઇતિ શ્રીરામાષ્ટપ્રાસસ્તુતિઃ સમાપ્તા ।

Proofread by PSA Easwaran

*Shri Ramashtaprasastutih*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*